# Shri Dattatreya Ashtottarashata Namastotram 2

# श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रम् २

## Document Information

Text title : dattAtreyAShTottarashatanAmastotram 2

File name : dattAtreyAShTottarashatanAmastotram2.itx

Category : deities_misc, dattAtreya, aShTottarashatanAma

Location : doc_deities_misc

Proofread by : Sunder Hattangadi

Description/comments : Dattatreya Stuti Manjari, Ed. S.V. Radhakrishnashastri. See Corresponding nAmAvalI

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 8, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रम् २

अस्य श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रमहामन्त्रस्य,
ब्रह्मविष्णुमहेश्वरा ऋषयः । श्रीदत्तात्रेयो देवता । अनुष्टुप्छन्दः ।
श्रीदत्तात्रेयप्रीत्यर्थे नामपरायणे विनियोगः ।
ॐ द्रां द्रीं द्रूं द्रैं द्रौं द्रः ।
इति करहृदयादिन्यासौ ।

ध्यानम्-
दिगम्बरं भस्मविलोपिताङ्गं चक्रं त्रिशूलं डमरुं गदां च ।
पद्मासनं योगिमुनीन्द्र वन्द्यं ध्यायामि तं दत्तमभीष्टसिद्ध्यै ॥

लमित्यादि पञ्चपूजाः ।
ॐ अनसूयासुतो दत्तो ह्यत्रिपुत्रो महामुनिः ।
योगीन्द्रः पुण्यपुरुषो देवेशो जगदीश्वरः ॥ १॥

परमात्मा परं ब्रह्म सदानन्दो जगद्गुरुः ।
नित्यतृप्तो निर्विकारो निर्विकल्पो निरञ्जनः ॥ २॥

गुणात्मको गुणातीतो ब्रह्मविष्णुशिवात्मकः ।
नानारूपधरो नित्यः शान्तो दान्तः कृपानिधिः ॥ ३॥

भक्तप्रियो भवहरो भगवान्भवनाशनः ।
आदिदेवो महादेवः सर्वेशो भुवनेश्वरः ॥ ४॥

वेदान्तवेद्यो वरदो विश्वरूपोऽव्ययो हरिः ।
सच्चिदानन्दः सर्वेशो योगीशो भक्तवत्सलः ॥ ५॥

दिगम्बरो दिव्यमूर्तिर्दिव्यभूतिविभूषणः ।
अनादिसिद्धः सुलभो भक्तवाञ्छितदायकः ॥ ६॥

एकोऽनेको ह्यद्वितीयो निगमागमपण्डितः ।
भुक्तिमुक्तिप्रदाता च कार्तवीर्यवरप्रदः ॥ ७॥

शाश्वताङ्गो विशुद्धात्मा विश्वात्मा विश्वतो मुखः ।
सर्वेश्वरः सदातुष्टः सर्वमङ्गलदायकः ॥ ८॥

निष्कलङ्को निराभासो निर्विकल्पो निराश्रयः ।
पुरुषोत्तमो लोकनाथः पुराणपुरुषोऽनघः ॥ ९॥

अपारमहिमाऽनन्तो ह्याद्यन्तरहिताकृतिः ।
संसारवनदावाग्निर्भवसागरतारकः ॥ १०॥

श्रीनिवासो विशालाक्षः क्षीराब्धिशयनोऽच्युतः ।
सर्वपापक्षयकरस्तापत्रयनिवारणः ॥ ११॥

लोकेशः सर्वभूतेशो व्यापकः करुणामयः ।
ब्रह्मादिवन्दितपदो मुनिवन्द्यः स्तुतिप्रियः ॥ १२॥

नामरूपक्रियातीतो निःस्पृहो निर्मलात्मकः ।
मायाधीशो महात्मा च महादेवो महेश्वरः ॥ १३॥

व्याघ्रचर्माम्बरधरो नागकुण्डभूषणः ।
सर्वलक्षणसम्पूर्णः सर्वसिद्धिप्रदायकः ॥ १४॥

सर्वज्ञः करुणासिन्धुः सर्पहारः सदाशिवः ।
सह्याद्रिवासः सर्वात्मा भवबन्धविमोचनः ॥ १५॥

विश्वम्भरो विश्वनाथो जगन्नाथो जगत्प्रभुः ।
नित्यं पठति यो भक्त्या सर्वपापैः प्रमुच्यते ॥ १६॥

सर्वदुःखप्रशमनं सर्वारिष्टनिवारणम् ।
भोगमोक्षप्रदं नृणां दत्तसायुज्यदायकम् ॥ १७॥

पठन्ति ये प्रयत्नेन सत्यं सत्यं वदाम्यहम् ।
इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे
श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रम् ।

इति श्रीदत्तात्रेयाष्टोत्तरशतनामस्तोत्रं (२) सम्पूर्णम् ।

Proofread by Sunder Hattangadi

*Shri Dattatreya Ashtottarashata Namastotram 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*